# ParivrAd Hridayam

# પરિવ્રાડ્ હૃદયમ્

## Document Information

Text title : Parivrad Hridayam

File name : parivrADahRRidayam.itx

Category : major_works, shataka, upadesha, shrIdharasvAmI, hRidaya

Location : doc_z_misc_major_works

Author : Shridharaswami

Acknowledge-Permission: Upendra Shripad Dasare, https://shridharamrut.com

Latest update : November 8, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# પરિવ્રાડ્ હૃદયમ્

મોક્ષાનન્દૈકદેહો નિખિલતનુભૃતાં પૂર્ણભાગ્યોદયાર્કઃ
    તત્ત્વજ્ઞાનાબ્ધિચન્દ્રઃ સકલનિગમવાઙ્મૌલિપીયૂષપૂર્ણઃ ।
જીવબ્રહ્મૈક્યરૂપં નિરતિશયસુખં કાશયન્વેદવેદ્યમ
    સચ્ચિત્સૌખ્યાત્મભૂમા જયતિ નિજરુચા શઙ્કરોયસ્તમીડે ॥ ૧॥

સ્વીયં સામ્યં વિધત્તે ગુરુરિતિ વચસા ચેત આકૃષ્યયત્નાત્
    વત્રે શ્રીદાસભક્તિં પરમખિલમિદં જ્ઞાતવાનસ્મિ સારમ્ ।
સત્યં સ્પર્શો ન કલ્પ્યો વિદિતમિતિ મયા સદ્ગુરુર્નોપમેયઃ
    દૃષ્ટાન્તો નૈવ દૃષ્ટસ્ત્રિભુવનજઠરે સદ્ગુરુસ્ત્વપ્રમેયઃ ॥ ૨॥

જ્યોતિઃસંસ્પર્શયોગાભ્દ્વતિ ખલુ યથા વર્તિરેવ પ્રદીપઃ
    આસ્તે સંલગ્નચેતા ગુરૂપદયુગલે ગૌરવં તત્સમેત્ય ।
અજ્ઞાનવધ્વાન્તનાશે પ્રથિત તરણિવદ્રાજતેયં ચિદર્ચિઃ
    પાપં તાપં ચ દૈન્યં પરિહરતિ નૃણાં સ્વસ્ય સંયોગલાભાત્ ॥ ૩॥

આદર્શાન્તે ચ દૃશ્યં સકલમપિ મૃષા વિશ્વમેતત્તથૈવ
    સચ્ચિત્સૌખ્યાત્મકે, યદ્ધવિકૃતમનિશં વીક્ષતે તત્સ્વરૂપમ્ ।
આયાતે વા પ્રયાતે જલમુચિ ખમિવ સ્વાન્તમાયાવિદૂરઃ
    આચાર્યાલ્લબ્ધબોધો ભ્રમ વિધુરમના રાજતે રાજતે ચ ॥ ૪॥

યત્સત્યાસત્યયોગાદખિલ જગદિદં ભાસતે તદ્વિચિન્ત્ય
    ક્ષીરં હંસો યથા તદ્વિચિનુત ઇતિ યઃ સ્વાત્મરૂપં સ ધન્યઃ ।
દુગ્ધે ગૂઢં યથોસ્તે ધૃતમિતિ સ યતિર્વિશ્વરૂપે સ્વમાત્રઃ
    જીવન્નપ્યદ્વયો યો ગુરુવચનકૃપાપાઙ્ગપીયૂષદૃષ્ટ્યા ॥ ૫॥

નિષ્કાસ્ય સ્વીયશક્ત્યા હૃદિકૃત નિલયાન્ કામશઙ્કૂઊશ્ચ ભૂયઃ
    સેવાં કુર્વન્નિરીહો વિગલિતમયતોહઙ્કૃતિઃ સાધુવૃત્તઃ ।
ભક્ત્યા શ્રુણ્વન્મુમુક્ષુઃ સ્ત્રવદમૃતવચઃ શ્રીગુરોર્જ્ઞાનદાતુઃ
    બુધ્દ્વા મત્વા ચ ધન્યો જગતિ વિજયતે બ્રહ્મરૂપઃ કૃતાર્થઃ ॥ ૬॥

આત્માનાત્મક્રમોઽયં પ્રથમમભિહિતઃસ્વીયદેહે પરસ્મિન્
    દેહોઽનિત્યો હ્યનાત્મા સ્વપરવપુષિ યો નિત્ય આત્મા સ્વયં સઃ ।
સ્વસ્માદ્ભિન્નં ચ દૃશ્યં સ્વપર વપુરપિ જ્ઞેયમાત્રં જડં યત્
    યચ્ચૈતન્યાભિયોગાદ્વ્યવહૃતિપટુતાં યાતિ તત્સ્વીયરૂપમ્ ॥ ૭॥

યન્ત્રે વિદ્યુદ્યથૌહં પ્રવહતિ તનુષુ સ્વાત્મભાનં તથૈતત્
    ચિન્માત્રં નિત્યિંસદ્ધં વિગલિતકલુષં દેહસઙ્ગાદ્વિમુક્તમ્ ।
તસ્માત્ સર્વેઽપિ દેહા વ્યવહૃતિપટવઃ સર્વસૌભાગ્યભાજઃ
    જીવોઽજ્ઞાત્વા વૃથૈવં વિષયમનુસરન્સર્વદુઃખં પ્રયાતિમ્ ॥ ૮॥

ભુક્તં પીતં ચ સર્વં પ્રભવતિ તનુતો ભિન્નરૂપં યદેવમ્
    નનાધાતુસ્વરૂપં તદિહ મતિમતા જ્ઞાયતે દેહયન્ત્રમ્ ।
કર્તા યન્ત્રસ્ય બાહ્યે વ્યવહરતિ તથા દૃશ્યતે ભિન્નેરૂપઃ
    સામાન્યાદ્વૈપરીત્યં સકલમિહ યતઃ સર્વમાશ્ચર્યમેતત્ ॥ ૯॥

યન્ત્રસ્યાસ્યાત્ર કર્તા વિદિતમિદમહો ચાલયત્યન્તરસ્થઃ
    મત્વૌહં યન્ત્રમેવં વહતિ દિનનિશં યાતિ પુસ્ત્રીત્વમન્યત્ ।
ગચ્છત્યાયાતિ ભાંઉક્તે વદતિ ચ કુરુતે વિસ્મરન્નામરૂપમ્
    દારાન્વિત્તં ચ પુત્રં પતિમિહ વિષયાન્કામયન્મૂઢ આસ્તે ॥ ૧૦॥

દેહોયં યન્ત્રમેવં વ્યવહૃતિ વિધયે દૃશ્યતે નાસ્ય યન્તા
    સ્વાન્યોન્યાધ્યાસતોસ્મિન્સકલમપિ ભવે જાયતે કર્મમોહાત્ ।
ગાઢં દુઃખં ચ ભૂયો વિવિધવિષયતો વાસનાપિ પ્રવૃધ્દા
    કાર્યાત્તદ્વાસનાસ્યાત્પુનરપિ ચ તયા કાર્યમેવાથ જન્મ ॥ ૧૧॥

દેહીહન્તા તદુત્થાત્વતિશયમમતાપુત્રભાર્યાદિકેષુ
    દ્રવ્યીન્યત્રાપિ ભૂયો બહુવિધવિષયે દુઃખદા નિત્યમેવ ।
પુસ્ત્વં વા સ્ત્રીત્વમન્યે ન ચ ભવતિ યત્સ્તસ્ય વૈકારિકેસ્મિન
    દેહે સ્ત્રીત્વં ચ પુંસ્ત્વં મનુત ઇતિ વૃથા મૌઢ્યસંસ્કારતોજ્ઞઃ ॥ ૧૨॥

સવર્ં દુઃખાસ્પદં યત્ક્ષણલવવિરસં પૂતિગન્ધં નિષ્કૃષ્ટમ્
    હન્તાત્યન્તાપવિત્રંહ્યતિશયકુહકં જાતમાત્રેણ હેયમ્ ।
વિણ્મૂત્રશ્લેષ્મપૂર્ણં ખપરવપુરહો સંવિદિત્વાપિ ભૂયઃ
    સૌન્દર્યાદ્યૈશ્ચ ભાવૈરનવરતમિદં મન્યતે તોષહેતુમ્ ॥ ૧૩॥

વિસ્મૃત્યાત્મસ્વરૂપં વિષયસુખકૃતનેકયત્નાન્વિધાસ્યન્

સ્વીયં મહત્વાતિહર્ષં ભજતિ ન સહસા વેત્યહં વઞ્ચિતોસ્મિ ।
વસ્ત્રાલઙ્કારતાપિ સ્વપરવરપુરહો સુન્દરં ભાવયિત્વા
જીવોયં વઞ્ચિતઃ સન્નમત ઇતિ વૃથા નારકે મુગ્ધચેતાઃ ॥ ૧૪॥

શ◌ૃઙ્ગારં વર્ણયન્તિ સ્વપરવપુરમે નૈવ જાનન્તિ ગર્હ્યમ્
મિથ્યા સ્ત્રીવર્ણનં યદ્વિકૃતમિતિ ન કિં ભાતિ તેષાં કવીનામ્ ।
ચારાઃ કામસ્ય સર્વે કથમપિ ચ જનાન્વઞ્ચયન્તોઽત્ર દુષ્ટાઃ
માદ્યન્તો મુગ્ધચિત્તાઃ પ્રથિતમલમિદં ભૂષયન્તિ સ્વવાગ્ભિઃ ॥ ૧૫॥

ભોગેનાત્યન્તસૌખ્યં યદિ મતિરુદિતા સૂર્યતે કામપુત્રમ્
વિઘ્નન્દૃષ્ટ્વેપ્સિતાર્થં તદનધિગમતઃ ક્રોધાવિર્ભવેચ્ચ ।
પ્રાપ્તોર્થો નૈવ નશ્યેન્મનુત ઇતિ યદા મોહ એતસ્ય નામ
દ્વારં સ્યાદુર્ગતેશ્ચ ત્રયમિહ ગદિતં વાસુદેવેન સાક્ષાત્ ॥ ૧૬॥

કામાખ્યો દુષ્કિરાતો નિજધનુષિ યદા મોહબાણાન્નિયોજ્ય
લક્ષ્મીકૃત્યાથ નારીં તરતનુમથવા નિક્ષિપત્યત્ર ચિત્રમ્ ।
એકાવિદ્ધાપિ યુગ્મં બત સપદિ ભવેન્નાપિ કોપો ન હિંસા
બાણૈરન્યૈશ્ચ મૃત્યુર્વિઘટનમથવા મેલનં વૃધ્દિરેતૈઃ ॥ ૧૭॥

જ્ઞાત્વાધ્યાત્માધિયોગાદરય ઇતિ સુધીઃ કામમોહાદિકાન્વૈ
જિત્વા હત્વા ચ ભૂયો નિજનિરતિશયાસઙ્ગશેસ્ત્રેણ પૂર્ણઃ ।
પૃથ્વી તસ્ય પ્રભાવાદ્ધરતિ જગદિદં યૌવને યો વિરક્તઃ
પશ્ચાત્તાપાદૃતે કિં વયસિ વિગલિતે સાધનીયં ચ પશ્ચાત્ ॥ ૧૮॥

આદૌ મધ્યે તથાન્તે વિષયવિષમિદં મોહજં નાશબીજમ્
કામક્રોધાશ્રિતં યત્ક્ષણસુખવિરસં પુષ્પિતં યૌવનેન ।
નાનાપાપૈશ્ચ પશ્ચાજ્જનિમૃતફલદં નારકં દુઃખકૃચ્ચ
યક્ત્વા જીવન્સમુક્તો ભ્રમરહિતમનાશ્ચિદ્ઘનાનન્દધામા ॥ ૧૯॥

નો દેહોનેન્દ્રિયં તન્મન ઇતિ ન મતિઃ પ્રાપયત્યાત્મરૂપમ્
કિં ભૂમ્યા કિં ચ ધાન્યૈરગણિત ધનતો ગેહતો રાજ્યતોઽપિ
ઇષ્ટૈર્મિત્રૈશ્ચ પુત્રૈઃ પશુભિરિહ ભવેત્કિઙ્ગ તથા કામિન્નીભિઃ
તત્પ્રાપ્ય । સર્વં યત્નાદ્ગૃહસુતવનિતા ક્ષેત્ર વિત્તાદિ દૂરમ ॥ ૨૦॥

વિજ્ઞાનજ્ઞાનપૂર્ણઃ પ્રવચનનિપુણો નીતિધર્મપ્રવીણઃ
સર્વત્રાત્મૈકદૃગ્યઃ સકલનિગમવાગ્ભૂષણઃ શાન્તચિત્તઃ ।
તીર્ત્વામોઽહં નિરિચ્છઃ સકરુણહૃદયઃ શબ્દપીયૂષપૂર્ણઃ

યત્સાન્નિધ્યાત્પ્રશાન્તં મન ઇતિ ચ ગુરું સંશ્રયેદ્ બ્રાહ્મણન્તમ્ ॥ ૨૧॥

યદ્વદ્ગૃધસ્ય દૃષ્ટિર્નભસિ વિહરતોધો મૃતપ્રાણીલગ્ના
તદ્વદ્વેદાન્તવક્ત્તા ધનકણવનિતાલાભદૃષ્ટિર્ય આસ્તે ।
શાબ્દંસ્યાદ્વર્ણનં તદ્વિરતિ વિરહિતં તેન લાભો ન દૃષ્ટઃ
શબ્દૈર્નસ્યાત્ક્ષુધાન્તઃ ક્ષુધમિહ સ કથં વારયેદન્નશૂન્યઃ ॥ ૨૨॥

નિત્યાનિત્યપ્રતીતિર્વિર્ષયવિરમણં ષટ્કમેવં શમાદેઃ
મોક્ત્તં વાઞ્છાતિતીવ્રા યદિ ભવતિ તદા સોધિકારી ચ મોક્ષે ।
નિત્યોઽહં ચિત્સુખાત્મા વિદિતમિતિ ચ યદ્દૃશ્યમાત્રન્ત્વનિત્યમ્
નિત્યાનિત્યાનુભૂતિર્વિલયતિ મહાજન્મદુઃખૌઘબીજમ્ ॥ ૨૩॥

અસ્મિંલ્લોકે યથાસ્યાત્તનુકરણમનઃ પ્રાણસાધ્યં તથાન્યે
લોકે સૌખ્યન્ન ચાન્યદ્વિષયભવમતઃ સ્વર્ગસૌખ્યં ન વાઞ્છેત્ ।
નીચોચ્ચૈઃ સાધનૈર્નો ભવતિ વિષયજં તારતમ્યં સુખસ્ય
લોકાન્નિર્વેદમાયાદકૃતમિહ ન તત્સ્યાત્કૃતેનાત્ર યસ્માત્ ॥ ૨૪॥

ઇષ્ટાપૂર્તે વરિષ્ઠં ન ચ ભવતિ તતોઽન્યઃ પ્લવઃ શ્રેય એવમ્
મત્વા સ્વર્ગાચ્ચ કર્મીઐ પુનરપિજનનં મૃત્યુલોકે પ્રયાતિ ।
ગત્વા બ્રહ્માણમિન્દ્રો વિરતિયુતૈતોવેત્સ્વરૂપં ચ તસ્માત્
ધીરા જ્ઞાત્વામૃતત્વં ધ્રુવમિહ ન ભવે પ્રાર્થયન્તધ્રુવેષુ ॥ ૨૫॥

શ્રેયો ધીરો વૃણીતે વિષયમનુસરન્પ્રેય એવાત્ર મન્દઃ
કામ્યં દુઃખૈકબીજં ક્ષણવિરસમથો જન્મદં મોહરૂપમ્ ।
અસ્માચ્છેરયશ્ચ ભિન્નં સતતમિહ ભવેદાદદાનસ્ય સાધુ
શ્રેયઃ સ્વાત્મૈવ સાક્ષાન્નિરતિશયસુખં નિર્ભયં બ્રહ્મસંજ્ઞમ્ ॥ ૨૬॥

દુઃખાન્તાન્મોહરૂપાન્પરિણતિવિરસાનિન્દ્રિયોત્થાનશુદ્ધાન
આમૃત્યુબ્રહ્મલોકં શતશતગુણિતાનસ્થિરાન્ કર્મજાન્તાન્ ।
આનન્દાન્સ્વાતિરિક્તાન્કુહકસલિલવદ્ભાસમાનાનસત્યમ્
ત્યક્ત્વા સર્વાન્સ્વપૂર્ણં નિરવધિ વિમલં ચિન્તયેદાત્મસૌખ્યમ્ ॥ ૨૭॥

સર્વેષાં પાતહેતુઃ પ્રથમમિહ ભવેત્કામરૂપો વિકારઃ
દુષ્પૂરેણાનલેન સ્વમપનયનતો વિહ્વલોજ્ઞોતિ દુઃખી ।
હન્યાત્કામારિમેનં ભવતિ ખલુ યતો વિઘ્ન આત્મપ્રતીતૌ
દેહસ્યૈવાત્ર ભાનં દૃઢયતિ ન તતો રૂપશૂન્યાત્મદૃષ્ટિઃ ॥ ૨૮॥

ચિત્સૌખ્યં સ્વાત્મનો યત્તદપનયનતઃ કામ એષોતિ દુષ્ટઃ
દૌર્ગત્યં દેહયોનાવહહ સુખમિતિ સ્વીય શક્ત્વા યુનક્તિ ।
જાતો યસ્માદ્ધિ પૂર્વં તદભિલષતિ યો જાયતે તત્ર ભૂયઃ
જેતવ્યોધ્યાત્મયોગાજ્જનિમૃતતિફલદઃ કામશત્રુશ્ચ યૂના ॥ ૨૯॥

લબ્ધ્વૈકં બ્રહ્મચર્યં ભવતિહિ સુતરાં નાન્યતો બ્રહ્મલાભઃ
તેનૈવેન્દ્રો હ્યવાસ સ્વયમતિનિકટૈ બ્રહ્મણસ્તત્તતો વેત્ ।
છાન્દોગ્યેસ્પષ્ટ મુક્તં કથિત ઇતિ કામનાશાય મન્ત્રૈઃ
લિન્દુંશ્ચેતં ત્વદત્કં કથમપિ ન કદા માભિગાં તદ્યશો હ્મ ॥ ૩૦॥

વેદે શાસ્ત્રેષુ પૂર્ણઃ કવિરપિ ચ તથા ગ્રન્થકર્તાપિ ભૂયો
યાવન્નો કામજેતા સતતમપિ ભૃણંસ્તત્વમેષોતિ બધ્દઃ ।
શાસ્ત્રં ભારોસ્ય જન્તોર્વહતિ યદિ વૃષઃશર્કરાં તેન કિં સ્યાત્
સ્વાદં કિં વેત્તિ દર્વી મણિયુતભુજગોન્તર્વિપો ભીષણોયમ્ ॥ ૩૧॥

સર્વાત્મબ્રહ્મનિત્યં મહદપિમહતો સુક્ષ્મરૂપાચ્ચ સૂક્ષ્મમ્
તત્ત્વં વિશ્વસ્ય સાક્ષી સ્વયમહમિતિ યત્સંસ્ફૂરત્સર્વ દેહે ।
ખલ્વેતદ્બ્રહ્મસર્વં નિરવધિમમલં નૈવ યોષિત્પુમાન્યત્
કા નારી કો નરો વા સુત ઇહ ચ તથા કુત્ર તત્કામજન્મ ॥ ૩૨॥

સર્વં પૂર્ણં શ્રુતેર્વાગતનુવિભવતો નિર્ગુણોકાય આત્મા
સવીસ્વેતાસુ ભૂમા તનુષુજપતિયઃ સર્વદા સોઽહમેવમ્ ।
તસ્મિત્ભૂનિમ્નસ્વરૂપે નર ઇતિ વનિતા મન્યતેત્રાવિવેકાત્
યત્તદુઃખસ્યમૂલં જનિમૃતિકૃદતો ભાવનાં તાં વિજહ્યાત ॥ ૩૩॥

દૃષ્ટ્વા દેહં નરો વા યુવતિરિતિ યદા ભાવનાજ્ઞાનતઃસ્યાત્
દેહાદન્યાશ્ચિદાત્મા કિલ નિરવધિતો યઃ સ તસ્યાવમાનઃ ।
એકો દેવઃ પ્રસિધ્દઃ પ્રતિતનુષુ યદા તસ્ય કસ્યાસ્ત્યપેક્ષા
જીવો બ્રહ્મૈવ સાક્ષાદયમિતિ વિદિતે કા ચ નારી નરઃ કઃ ॥ ૩૪॥

સ્વાત્મન્યદ્વૈતરૂપે નિખિલજગદધિષ્ઠાન ભૂતે ચ ભૂમ્નિ
સ્ત્રીત્વં વા પુંસ્ત્વમેતન્મનુત ઇતિ યદા દેહતઃ સ્વાત્મઘાતઃ ।
યેવિદ્વાંસો ન યેષાં નિરવધિમમલં સ્વાત્મરૂપં વિભાતિ
“તસૂર્યાનન્દલોકા“નતિશયતમસા ચાવૃતાંસ્તાન્પ્રયન્તિ ॥ ૩૫॥

યાસ્મિંસ્તત્સ્વાત્યરૂપં નિભૃતવિરતિતઃ પ્રસ્ફુટં સ્યાત્સ્વદેહે
ન નો નારી સ જીવો વિધિરપિ ન તથા શ્રૂયતે કર્મણાસ્ય ।

સંસ્કારાપીહ ન સ્યાત્સ્વયમિહ શુચિતઃ પ્રવ્રજેત્સ સ્વમાત્ર
ચત્વારો યે કુમારાઃ સનકમુખકૃતા જાતરૂપાશ્ચરન્તિ ॥ ૩૬॥

સન્યાસ્તાસ્ત્રીષુ ગાર્ગી વ્રજનમિતિ તતો વેદબાહ્યં ન તાસામ્
"તાન્યેવં વાવરાણિ" શ્રુતિરિહ તનુતે ન્યાસ એવાતિ ભૂયાન્ ।
"વિદ્વાંસઃપ્રવ્રજન્તે" "યદહરિહ તદા પ્રવ્રજેદ"યો વિરક્તઃ
જ્યાયાન્નો વા કનીયાન્પ્રભવતિ મહિમા બ્રાહ્મણસ્યૈષ નિત્યઃ ॥ ૩૭॥

દિવ્યે વા લૌકિકે વા કિમપિ ન મનસશ્ચિન્તનં ચાપિ સૌખ્યે
સ્વપ્નેઽપ્યેવં જુગુપ્સા વમનવદિહ તદ્ભોગ્યમાત્રે ચ નિત્યમ્ ।
ભોગ્યે પૂર્ણા વિરક્તિઃ કૃતસુકૃતભરાજ્જન્મદુઃખાદનેકાત્
જન્મન્યસ્મિંશ્ચ જાતા ભવતિ સ મતિમાન્નયાસ એવાધિકારી ॥ ૩૮॥

સંન્યાસો નૈવ કેચિદ્વિહિત ઇતિ કલૌ ખ્યાપયન્તે વૃથૈવ
સંન્યાસો ભૂમિકેયં બહુજનનભવોદેતિ વૈરાગ્યતશ્ચ ।
યસ્માત્સ્વાભાવિકીયકૃતસુકૃતફલા મુક્તિસોપાનમાર્ગે
પ્રારબ્ધં તત્તોસ્માત્પ્રચલતિ હિ કલૌ "નૈવ શક્યોપનેતુમ" ॥ ૩૯॥

દૃષ્ટાઃ પૂંર્વ કુમારાઃશુક ઇતિ ચ તથા શઙ્કરોન્યે તતોસ્માત્
જાતા બાલ્યાદ્વિરક્તા બહવ ઇહ યતો જ્ઞાનવિજ્ઞાનપૂર્ણાઃ ।
જ્ઞાનં વૈરાગ્યમેતત્સમુદિતમતુલં પૂર્વસંસ્કારયોગાત્
સૂર્યશ્ચાહં મનુશ્ચ શ્રુતમિદમુદિતં વામદેવેન ગર્ભે ॥ ૪૦॥

જ્ઞાત્વા નિઃસારમેવં જગદખિલમિતઃ પ્રવ્રજેદ્યો વિવેકી
બાલ્યેશક્યં સ ગચ્છેદ્વિધિરિતિ સ તદા હ્યાશ્રમાદાશ્રમં ચ ।
સંન્યસ્તો યાજ્ઞવલ્ક્યઃ શ્રુતિશિરસિ યતો ન્યાસ એવાતિ મુખ્યઃ
સંન્યાસઃ સર્વયત્નાદધિગત યશસા સાધનીયો વિમુક્ત્યૈ ॥ ૪૧॥

રજ્જવજ્ઞાનેન સર્પો જનિત ઇહ યથાભાતિ મન્દાન્ધકારે
સ્વાત્માજ્ઞાનાત્તથાસ્યાદ્વિવિધવિષયિણી વાસના મન્દબુધ્દૌ ।
સચ્ચિત્સૌખ્યે સ્વરૂપે કથમપિ ન યતોન્યદ્ભવેત્સ્વપ્રતીત્યા
બુધ્દ્વા સમ્યક્સ્વરૂપં નિજસુખકવલાસ્વાદતૃપ્તઃ પરિવ્રાટ્ ॥ ૪૨॥

કેષાઞ્ચિત્સ્યાદ્વિરક્તિઃ સ્વયમિહવિષયે સઞ્ચિતાદેવ બાલ્યે
તેષાં જ્ઞાનં ચ પશ્ચાદ્ગુરુચરણકૃપા પાઙ્ગસઙ્ગપ્રસઙ્ગાત્ ।
પશ્યન્તોન્યન્ન કિઞ્ચિજ્જગતિ નિજરુચા જન્મતો જ્ઞાનિનો યે
તેષાં નો ગુર્વપેક્ષા, નિરતિશયસુખાઃ પૂર્ણતૃપ્તાઃ સ્વસિધ્દા ॥ ૪૩॥

બન્ધાયાસક્તચિત્તં વિષયવિરહિતં સ્યાચ્ચિતં વિમુક્ત્યૈ
ભોગેચ્છા સૈવ બન્ધઃ શ્રુતિશિરસિ યતસ્તાંસ્ત્યજન્મોક્ષભાગી ।
ઇચ્છાવિઘૈવ સાક્ષાત્તદપનયનતો જીવભવસ્ય નાશઃ
દૃષ્ટાદૃશ્યાદ્ધિ બધ્દો ભવતિ ચ સુતરાં દૃશ્યશૂન્યે વિમુક્તઃ ॥ ૪૪॥

ત્યક્ત્વા દ્વે નામરૂપે જગત ઇહ તતઃ શેષયિત્વા સ્વરૂપમ્
સચ્ચિત્સૌખ્યાદ્વયં યદ્ભવતિ સ પુરુષો દૃશ્યશૂન્યો વિમુક્તઃ ।
રજ્જુઃસર્પસ્ય બાધે સ્વયમિહ વિગતાશેષભાવા યથાસ્તે
તદ્વત્સ્યાત્સ્વીયરૂપં વ્યપગતસકલં સચ્ચિદાનન્દમાત્રમ્ ॥ ૪૫॥

ત્યક્ત્વા કાર્યસ્ય દૃષ્ટિં સકલજગદધિષ્ઠાનભૂતં સ્વરૂપમ્
જ્ઞાત્વા તત્સર્વસામ્યાદ્વ્રજતિ ચ પરિતઃ કાશયન્સૂર્યવદ્યઃ ।
નિત્યાનન્દઃ પરાત્મા નિરવધિરમલોસઙ્ગરૂપઃ પરિવ્રાટ્
તસ્મિન્સત્યસ્ય સત્યે જગદુખિલમિદં નાવિંરાસીન્ન નશ્યેત્ ॥ ૪૬॥

ત્વઙ્નિર્મોકાત્સ્વશક્ત્યા બહિરહિરિવ યે લબ્ધબોધા વ્રજન્તિ
જ્ઞાનાદ્વૈરાગ્યમેષાં ભવતિ વિરતિતો જ્ઞાનલાભઃ પરેષામ્ ।
પારિવ્રાજ્યં દ્વિધા સ્યાન્નિયમિતમસાં જ્ઞાનવૈરાગ્યપૂર્વમ્
દેહાદ્દેહાત્તતઃ સ્યાત્સકલમિદમહં બ્રહ્મમાત્રૈકરૂપમ્ ॥ ૪૭॥

ત્યક્ત્વાદૌ ભોગવાઞ્છા ત્યજતિ સ મતિમાન્સર્વભેદાત્મદૃષ્ટિમ્
ભાવાભાવૌ તતોસ્માચ્ચલતિ ન સુતરાં ધીર્દૃઢા નિર્વિકલ્પાત્ ।
નો સત્યં નાપ્યસત્યં કિમપિ ન મનુતે સ્વાત્મમાત્રોદ્વિતીયઃ
સર્વસ્યૈતસ્યચાત્મા જગતિ વિજયતે સચ્ચિદાનન્દમાત્રઃ ॥ ૪૮॥

યત્રાનન્દાશ્ચ મોદાઃ પ્રમુદ ઇતિમુદા સર્વ એતે વિશન્તિ
બ્રહ્માનન્દેત્ર સર્વે સ્વયમમલપદે પૂર્ણકામા ભવન્તિ ।
ભિન્નં નાપ્યભિન્નં કિમપિ ન ચ તતઃકસ્યવૈશિષ્ટ્યમેષામ્
સ્વીયે સચ્ચિદ્ઘને યત્સકલમુપશમં યાતિ કિં ચાન્યદસ્માત્ ॥ ૪૯॥

જાલ્મઃ કામોતિ દુષ્ટો મનુજમનુપદં બાધતેન્તર્નિલીનઃ
સોઢું શક્તોનુકો નો સકૃદપિ મનુતે ભોગતોસ્માદ્વિમોકમ્ ।
વ્યાધેર્નાશાય યદ્વદ્ભયુપચરતિ તથા કામમોહસ્ય તાપઃ
શામ્યેદ્યોગેન મત્વા બત વિષયમતઃ પામરોયોત્ર ભુઙ્ક્તે ॥ ૫૦॥

કામઃશાભ્યેન્ન ભોગાદિતિગદિતમતો બુધ્દિમેતિ પ્રયત્નાત્

અગ્નિર્યાવાંશ્ચ ભૂયાન્ઘૃત ઇહ પતિતે કામતૃપ્તિસ્તથા સ્યાત્ ।
ભોગૈર્વૃધ્દશ્ચકામઃ પુનરપિ ચ તતો ભોગ એવાત્ર ભૂયાન્
શાશ્વ્યેન્નૈવાસ્ય તૃષ્ણા મૃગજલત ઇતો નૈવ યત્નોઽપિ શાન્તઃ ॥ ૫૧॥

ભુમૌ યાવધ્દિરણ્યં પશુયુવતિજના ધાન્યમેતત્સમસ્તમ્
ક્રોડીકૃત્યાયથ દત્તં નિખિલમપિ ચ તન્નાલમેકસ્ય તૃપ્ત્યૈ ।
મત્વા ચિત્તસ્ય શાન્ત્યૈ શમમતિસુખદં હ્યાવ્રજેદ્યો વિવેકી
વાક્યં નિર્દુષ્ટમેતદ્વદતિ મનુરહોનાવમન્યેત જાતુ ॥ ૫૨॥

યશ્ચૈતાન્પ્રાપ્નુયાદ્વૈ જગતિ ચ સકલાન્કેવલાન્યસ્ત્યજેત્તાન્
ભોગાનાં પ્રાપણાત્સ્યાન્મનુરિહ મનુતે ત્યાગ એષાં વરિષ્ઠઃ ।
યસ્યાત્કામસ્ય સૌખ્યં જગતિ યદપિ તત્સ્વર્ગસૌખ્યં ચ દિવ્યમ્
સૌખ્યં તૃષ્ણાયક્ષયાદ્યદ્ભવતિ ન ચ કલા ષોડશી તસ્ય તત્સ્યાત્ ॥ ૫૩॥

આસ્તે મૂર્તિર્યથૈકાત્વભિનવઘટિતા સર્વ સૌન્દર્યરૂપા
જાતા મૃત્કર્પટાદ્યૈર્નિજકુટિલદૃશા મોહયન્તી જનાનામ્ ।
નિઃસારા ભોગલબ્ધૌ નયનમતિહરા દૂરતોતીવ રમ્યા
દુર્ગન્ધદ્રવ્યપૂર્ણા હ્યશુભતનુરહો તદ્વદેવાતિહેયા ॥ ૫૪॥

જિત્વા સર્વાણિયત્નાજ્જયતિ યદિ ન ચેદિન્દ્રિયં ચૈકમસ્માત્
પ્રજ્ઞા તેનૈવ સાકં ક્ષરતિ નિમિષતો વારિ યાવદ્દૃતેર્વૈ ।
તસ્માદાદૌ જયેત્તત્પરમમતિયુતો યન્મનઃ સર્વમુખ્યમ્
પશ્ચાત્સર્વેન્દ્રિયાણિ સ્વયમિહ હિ વશે સ્વાનુભૂત્યા ભવન્તિ ॥ ૫૫॥

કણ્ડૂં કણ્ડૂયમાનામતિશયસુખદાં મન્યમાનોઽપિ નેચ્છેત્
તત્પ્રાપ્ત્યર્થં ન યત્નઃ કુરુત ઇતિ તથા સ્યાન્ન તદ્વાસનાપિ ।
તદ્વજ્જ્ઞાત્વેન્દ્રિયોત્થં સુખમપિ ન ચ તત્કામયેદ્યો વિવેકી
કણ્ડતિગ્રસ્તચિત્તો બત કિમુતસુખી ધાન્ય એવં કૃતી ચ ॥ ૫૬॥

ત્યક્ત્વા લૌલ્યં ચ કર્માણ્યુપરતિત ઇતો ભોગશૂન્યો વિરક્તઃ
જિત્વા વિઘ્નાનશેષાનવિકૃતમનસા નિત્યસૌખ્યાત્મદૃષ્ટ્યા ।
નિત્યં બ્રહ્માહમેકં નિજગુરુવચસા ભાવયિત્વાનુભૂઆત્યા
શ્રધ્દાયુક્તો મુમુક્ષુર્નિરતિશયસુખસ્વાત્મતુષ્ટઃ કૃતી સ્યાત્ ॥ ૫૭॥

યત્પ્રીત્યા પ્રીતિપાત્રં સકલમપિ નૃણાં તદ્વવેદાત્મરૂપમ્
આત્માર્થં સ્ત્રી તથા સ્યાત્પતિરપિ ચ તતો દ્રવ્યપુત્રાદિકં યત્ ।
સ્વિયે દેહેઽપિ તદ્વન્નિજમનસિ મતૌ પ્રીતિરાત્માર્થમેવ

પ્રોયાન્યત્સ્વાત્મભાનં ત્વહમિતિ કિમુત સ્વાત્મરૂપં યદસ્તિ ॥ ૫૮॥

યાવદ્યસ્મિન્પ્રિયત્વં પ્રભવતિ ખલુ તત્સૌખ્યદં વસ્તુતાવત્
સર્વસ્માત્પ્રીતિરાત્મન્યધિકવિષયિકા શ્રેષ્ઠસૌખ્યં સ્વતઃસ્યાત્ ।
દાતું ભોક્તું સ્વરૂપેઽહમિ ન ચ કિમપિ સ્વાત્મનોન્યદ્યતસ્તત્
સર્વસ્માચ્છેરષ્ઠસૌખ્યં સ્વયમિહ નિખિલે સ્વાર્થિષૈવેતિ સાક્ષાત્ ॥ ૫૯॥

દૃશ્યં યદ્બાહ્યસૃષ્ટૌ વિશદયતિ નિજં ભિન્નભિન્નાકૃતેસ્તત્
પશ્યેશ્ચક્ષુસ્તથેદં વિદિતમિહ ભવેશ્ચેતસા તન્મનોઽપિ ।
બુધ્દિર્જાનાતિ બુધ્યા ચપલમન ઇદં વેત્તિ યત્સ્વેન ભાસા
બુદ્ધેઃસાક્ષી સ્વતોર્ચિસ્તમસ ઇતિ તથાહં કૃતેસ્તત્વયં હિ ॥ ૬૦॥

અન્યત્સ્વસ્માદ્યદેવં જનિતમિતિ ચ તન્નાશમભ્યેતિ પશ્ચાત્
કો વા બુધ્યેત્સ્વનાશં જનમતિ ચ યદાવેન્ન તસ્યાસ્તિ નાશઃ ।
નાશો યસ્માન્નમેસ્ય સ્વજનિરપિ તથા જાતમેવેહ નશ્યેત્
નિત્યં સશ્ચિત્સુખૈકં સકલતનુષુ યદ્બ્રહ્મ તેનાહમદ્ધા ॥ ૬૧॥

બ્રહ્યૈવાગ્રે સદેકં સકલમિદમહોવેત્તદેવાહમેવમ્
સ્વાત્માનં તત્તોઽસ્માદભવદિતિ યતઃ ખલ્વિદં બ્રહ્ય તસ્માત્ ।
દીવાનાં વા ઋષીણાં તદભવદિતિ યસ્તન્નૃણાં પ્રત્યબુધ્યત્
તદ્બ્રહ્મૈવાહમસ્મીત્યનુભવૌદિતે બ્રહ્મ સોત્ર ભુતેર્વાક્ ॥ ૬૨॥

નામ્નાહં સ્વાત્મરૂપં યદભવદિતિ તત્સ્વીચ્છયા સ્વીયશક્ત્યા
સર્વાસ્વેતાસુ સંસ્થં ત્વહમિતિ તનુષુ સ્વેન ભાસા સ્વમાત્રમ્ ।
યઃકોપ્યામન્ત્રિતઃસન્નહમિતિ વદતિ સ્વીયનામેતિ તસ્માત્
ભૂમાત્મૈકોઽહમેવં વ્યવહૃતિ વિધયે ભિન્નરૂપૈર્યુતોઽપિ ॥ ૬૩॥

સર્વેષ્વેતેષુ દેહેષ્વહમહમિતિ યઃ સ્વેન રૂપેણ ભાતિ
પ્રાક્સર્વસ્માત્સ એકઃ સ્વયમિહ ન તથાન્યન્ન કિઞ્ચિત્તદાનીમ્ ।
એકાકી નૈવ રેમેઽપરમતિ ન તથાપશ્યદત્રાત્મનઃ સઃ
વમાવામેન ભૂત્વા સ્વયમભવદયં પૂરુષો દક્ષિણેન ॥ ૬૪॥

પ્રાગેકાકી સ ભૂત્વા વિષયમનુસરન્કામ્યમાનોત્ર જાયામ્
પુત્રં વિત્તઞ્ચ સર્વં હ્યયુપકરણમથો કર્મ કુર્વંસ્તદર્થમ્ ।
એકા લાભેપ્ય કૃત્સ્નો મનુત ઇતિ તથા નાન્યદસ્માદ્વરિષ્ઠમ્
ક્લેશાન્પ્રાણાવશેષાન્સહત ઇતિ તતો ભૂય એવાત્ર મુગ્ધઃ ॥ ૬૫॥

અસ્મચ્છબ્દો યથૈઆવ પ્રચલતિ ચ તથા સર્વ લિઙ્ગેષુ યુષ્મત્
 ત્વં વાહં ભાનતોયં સકલવપુષિ યો લિઙ્ગશૂન્યોદ્વયઃ સઃ ।
નકારો ના વિકારો નિજનિરતિશયાદાત્મરૂપં હિ સર્વમ્
 કા નારી કો નરઃ સ્યાદહહ જગદિદં દુઃખમૂલં વિમૌઐઢ્યાત્ ॥ ૬૬॥

સાક્ષી સર્વસ્ય ભૂમા સકલજગદધિષ્ઠાનરૂપોતિવિશ્વઃ
 સર્વાસ્વેતાસુ નિત્યં હ્યયમિતિ તનુષુ સ્વીયરૂપેણ ભાતિ ।
સર્વત્રાદ્વૈતરૂપો જનિમૃતિરહિતો નામરૂપાદ્વિમુક્તઃ
 ચિદ્રૂપઃ પ્રત્યગાત્મા પ્રકૃતિવિકૃતિભિર્નાનુલિપ્તસ્ત્વસઙ્ગઃ ॥ ૬૭॥

જાગ્રબ્દાલ્યાદ્યવસ્થાસ્વહમિતિ સતતં વ્યેતિ તન્નૈવ યસ્માત્
 ભિન્નસ્તાભ્યોવિકારી વિલસતિ સકલેષ્વેવ દેહેષુ પૂણર્ઃ ॥

બુદ્ધેઃ સાક્ષી સ્વયં યઃ સદ્સદિદમહો ભાસયાન્નિર્વિશેષઃ
 સર્વેષ્વેતેષ્વયોગ્નિપ્રતિમ ઇહ સદા સ્વેન રૂપેણ દીપ્તઃ ॥ ૬૮॥

ઈશાવાસ્યં શ્રુતેર્વાગ્જગદખિલમિદં નેહનાનાસ્તિ કિઞ્ચિત્
 મૃત્યોરાપ્નોતિ મૃત્યું જગદખિલમિદં યસ્તુ નાનેવ પશ્યેત્ ।
બહ્મૈવેદં વરિષ્ઠં ભવતિ ચ સકલં વિશ્વમેતત્સ્વયં યત્
 આંર્ત સ્યાદ્યત્તતોન્યચ્છ્રુતિગદિતમિદં ભેદતો ભીશ્ચઃ મૃત્યુઃ ॥ ૬૯॥

જ્ઞાત્વા દેવં તથેવં તરતિ ભવમિમં મુચ્યતે સર્વપાશૈઐઃ
 પન્થા નાન્યોતિમૃત્યં નયતિ યત ઇતો વિદ્યતે નાયનાય ।
જ્ઞાનાદેવામૃતત્વં ભવતિ ન પુનરાવર્તતે પૂર્ણકામઃ
 પ્રાણાઃ ક્રામાન્તિ નૈવ ક્વચન ન ગમનં તસ્ય યઃ સ્યાદ્વિમુક્તઃ ॥ ૭૦॥

ભોક્તવ્યં જ્ઞસ્ય નાસ્તિ સ્વયમિહહિ યતઃ પૂર્ણાનન્દરૂપઃ
 સર્વત્રાવસ્થિતાયં સ્વયમનતિશયઃ કુત્ર ગચ્છેત્કિમર્થમ્ ।
અજ્ઞો દેહાત્મબુધ્યા વિવિધ વિષયતઃ કર્તૃભોક્તૃત્વમેત્ય
 કર્માધોધ્વર્ગ્ચ ભોક્તું જનિત ઇતિ ભવેધ્ધાસતઃ સ્વચ્છયૈવ ॥ ૭૧॥

ક્ષીયન્તસ્મિંશ્ચ દૃષ્ટે શ્રુતમિહહિ યતઃ સર્વકર્માણિ ચાસ્ય
 કર્મપ્રાપ્તં સુખં યત્તદપનયનતો નિત્યસૌખ્યં હિ વિદ્વાન ।
નો શોકો જન્મદુઃખં મરણમપિ તથાનન્દમાત્રાત્મનોસ્ય
 જ્ઞાત્વા બ્રહ્મૈક્યમેત્ય સ્વયમિતિ સ યતિઃકેવલો નિર્વિકલ્પઃ ॥ ૭૨॥

મત્વા સૌખ્યં સ્વતોન્યત્તદનધિગમતો દુઃખરૂપૌત્ર જીવઃ

જ્ઞાતે તત્ત્વે સ ભૂમા સ્વયમિતિહિ સુખં નૈવ દુઃખં સુખસ્ય ।
જતં ક્ષીયેતસાક્ષી સ્વયમિહ સકલં વેત્તિ યઃ સોવિનાશી
સૌખ્યં યત્સ્વાત્મનોન્યજ્જનિમૃતિમદહો સ્વાત્મસૌખ્યં નતાવત્ ॥ ૭૩॥

દ્રષ્ટા દૃશ્યાદ્વિભિન્નઃ શ્રુતિ શિરસીયતાશ્ચિદ્ઘનઃ સ્વેન ભાસા
દ્રષ્ટુર્દૃષ્ટેર્ન લોપો યદિ ભવતિ તતઃ કેવલે કિં તતોન્યત્ ।
યત્રાન્યત્સ્યાત્તદલ્પં નિજનિરવધિતો યત્ર નાન્યત્સ ભૂમા
દ્રષ્ટત્વે જીવ એવં જનિમૃતિરહિતઃ શાશ્વતાનન્દ એવ ॥ ૭૪॥

જ્ઞાત્વા બુધ્દેઃ પરોઽહં સતતમિતિ ચ તત્સ્વાત્મરૂપં હિ બુધ્વા
જહ્યાત્કામં સ્વદૃષ્ટયા વદતિ યદુપતિઃ સ્વાત્મસૌખ્યાય નિત્યમ્ ।
નિર્દોષં બ્રહ્મ નિત્યં સમમિહસકલેસ્મિન્સ્થિતાસ્તે ચ મુક્તાઃ
કસ્માતૈઃ પ્રેત્યજીવન્નિહહિ જિત ઇતિ શ્રીપતિઃ સર્ગ આહ ॥ ૭૫॥

વિક્ષેપો નાંસ્તિ યસ્માન્મમ ન તત ઇહ સ્યાત્સમાધિઃ કદાપિ
વિક્ષેપો વા સમાધિર્મનસ ઇતિ ન મે નિર્વિકલ્પોહમાત્મા ।
નો કુર્વે કારયેઽપિ સ્વયમિહ જગતઃ સાક્ષ્યતઃ સ્વસ્થ આસે
સ્વાત્માનં વેદ્મિ યસ્માદૂપનિષદિ મતં ચાવધૂતેન ગીતમ્ ॥ ૭૬॥

જ્ઞાત્વા સ્વાત્માનમેવં નિજજનવનિતાવિત્તપુત્રૈષણાયાઃ
વ્યુત્થાય બ્રાહ્મણાસ્તે શ્રુતિરિહ તનુતે ભૈક્ષમેવાશ્રયન્તે ।
જક્ષન્ક્રીડંશ્ચ યાનૈર્યુવતિભિરથવા ન સ્મરે તચ્છરીરમ્
સર્વત્રાયકાયરૂપં વિમલસુખઘનં વીક્ષતે જ્ઞઃ સ્વરૂપમ્ ॥ ૭૭॥

દેહાત્મજ્ઞોવિવેકી મનુત ઇહ યતોધ્યાસતો દેહદૃષ્ટયા
નામાકારાન્ગુણાન્યઃ પુરુષ ઇતિ ચ વા સ્ત્રી નં તસ્યાત્મદૃષ્ટીઃ ।
યદ્વન્મૂઢસ્ય ભાયાદ્વપુરિતિ સતતં તદ્વદેવાત્મદૃગ્યઃ
તસ્યૈકં નિર્વિકારં નિરતિશય સુખં સર્વતશ્ચિત્સ્વરૂપમ્ ॥ ૭૮॥

પ્રાક્પશ્ચાદસ્તિ કુમ્ભાદ્ગગનમિદમહોશ્લિષ્ટમેવં પૃથગ્યત્
કુમ્ભોત્પત્તાવપીહ વ્યવહૃતિ સમયે સર્વદા સર્વતશ્ચ ।
સર્વત્રૈવેહ તદ્વશ્ચલનવિરહિતં સર્વદા ચિત્સુખં યત્
તિષ્ઠન્ક્રીડંશ્ચ ગચ્છન્મનુત ઇતિ સદા સ્વીયરૂપં પરિવ્રાદ્ ॥ ૭૯॥

તાવત્સર્વે તરઙ્ગા અતિશયતરલા રૂપતો ભાન્તિ ભિન્નાઃ
યાવન્ન જ્ઞાતમેતત્સકલમપિ જલં ભેદશૂન્યં સ્વમાત્રમ્ ।
જ્ઞાની પાથસ્તરઙ્ગાન્વયવદિહસદા સર્વમાત્વૈવ પશ્યન્

આસ્તે બ્રહ્મૈવ ભૂત્વા હ્યવિકૃતમનિશં કેવલં ચિત્સુખં યત્ ॥ ૮૦॥

જ્ઞાત્વા સર્વેષુ ભૂતેષ્વહમિતિ સતતં નો જુગુપ્સેત વિદ્વાન
યસ્મિન્સર્વાણિ ભૂતાન્યહમિહહિ યદાભૂત્તદા જાનતોસ્ય ।
પાર્થક્યં નાપિ તેમ્યઃ ક્વચિદપિ ન ચ તચ્ચિન્તન ભિન્નદૃષ્ટ્યા
સ્યાત્કો મોહશ્ચશોકઃ શ્રુતિગદિતમિદં સ્વીયમેકત્વદૃષ્ટેઃ ॥ ૮૧॥

ભૂતસ્થાત્માનમેવં ભ્રમરહિતમનાઃ સર્વભૂતાનિ વિદ્વાન
સ્વાત્મન્યેવાત્ર પશ્યન્બૃહદિતિ પરમં યાતિ નાન્યેન જાતુ ।
કૈવલ્યે દત્તદૃષ્ટીઃ સ હિ ભવદિતિ યદ્ભૂતમેવં ભવિષ્યત્
જ્ઞાત્વા ભૂમાનમેવં સકલમિદમહં મન્યતેસૌ પરિવ્રાટ્ ॥ ૮૨॥

તદ્બ્રહ્મૈવાહમસ્મીત્યનુભવ ઉદિતે સર્વભેદપ્રમોક્ષઃ
જીવન્મુક્તસ્તુરીયો ભ્રમરહિત હૃદા સ્વાત્મસૌખ્યાવશિષ્ટઃ ।
રાગદ્વેષૌ ન કામઃ ક્વચિદપિ ન તથા ભેદબુદ્ધિશ્ચ તસ્મિન્
ભાયાદ્વાપ્યત્ર તિષ્ઠેત્સકલમપિ હુતં સ્વાત્મરૂપે ચિદગ્નૌ ॥ ૮૩॥

રૂપં રૂપં ચ ભૂત્વા સકલ તનુષુ યઃ પ્રાવિશત્સોદ્વયઃ સ્યાત્
“સુક્તે“દૃષ્ટં ચ સંર્વ પુરુષ ઇતિ તતઃ કા ચ નારી નરઃ કઃ ।
અજ્ઞાની નૈવ જાનન્વિષયસુખકૃતે પ્રેક્ષતે ભેદભાવાન્
બ્રહ્મજ્ઞાની પરિવ્રાટ્ વિષયવિરન્તિતો ભિન્નભાવાતિરિક્તઃ ॥ ૮૪॥

યસ્માન્નૈવા પરં વાપરમિતિ ચ તથાસ્તીહ કિઞ્ચિચ્છ્રતેર્વાગ્
જ્યાયો નાગીય એવં ન ચ ભવતિ તતસ્ત્વેષ રુદ્રોત્રૈ સર્વઃ ।
શ્રેષ્ઠઃકો વા કનિષ્ઠઃ પુરુષ ઇતિ તથા સ્ત્રી ન કોપ્યત્ર ભેદઃ
એકો નિષ્કમ્પ આત્મા શ્રુતિમથિતમહશ્ચિત્સુખં બ્રહ્મભિક્ષૂઃ ॥ ૮૫॥

સચ્ચત્યચ્ચાભવદ્ઘન્નગનગરનરારામતોઽપિ સ્વયં તત્
યદ્ભૂતં યચ્ચ ભવ્યં ભવદિતિ સકલં નૈવ ભિન્નં યતોસ્માત્ ।
વસ્ત્રે જિજ્ઞાસ્યમાને ભવતિ કિલ યથા સૂત્રમાત્રાવશેષમ્
કાર્યે જિજ્ઞાસ્યમાને શ્રુતિ શિરસિમતં ખલ્વિદં બ્રહ્મભિક્ષુઃ ॥ ૮૬॥

એકઃ સન્ભિદ્યતે યસ્તનુકરણમનો ધર્મજાત્યાદિ ભેદાત્
ભ્રાન્ત્યૈવેત્થં સ એકઃ સ્વયમિહ બહુધા જાયતેજાયમાનઃ ।
ઇન્દ્રો માયાભિરેવં ભવતિ નિગમાવાઙ્નેહ નાનાસ્તિ કિઞ્ચિત્
દૃષ્ટવ્યોત્રૈક ધૈવત્વજ ઇતિ સતતન્નામતો રૂપતોઽપિ ॥ ૮૭॥

અગ્રે જ્ઞાનં યદાસીત્તદનુગતમિદં સર્વતઃ સ્વેન ભાસા
 કાર્યં તાવજ્જડં સ્યાદનુભવ ઇતિ યો જ્ઞાનરૂપઃ સ સર્વઃ ।
કાર્યં વાતાવજ્જડં વા વિદિતમિહ યતો જ્ઞાનરૂપેણ સર્વમ્
 કાર્યં સ્યાત્કારણં ચિત્સ્વયમિહ ન તતો ભિન્નમેતત્સ્વતોસ્તિ ॥ ૮૮॥

ચિદ્વીદં સર્વમેવં શ્રુતિષુ નિગદિતં નાનૃતં તત્કદાચિત્
 ન સ્યાજ્જ્ઞાનાતિરિક્તં વિદિતમિહ યતો જ્ઞાનમાત્રં હિ કાર્યમ્ ।
કાર્યં યજ્જ્ઞાનરૂપં ચિદિતિ લસતિ તન્નાદ્વિતીયેત્ર તિષ્ઠેત
 ભિન્નત્વં વા બહુત્વં જનિમૃતિરથવા ભોગ્યભોક્તૃત્વમન્યત્ ॥ ૮૯॥

સ્વસ્મિન્સર્વસ્ય પૂર્વં સમ્રુદિતમહમિત્યેવ સર્વ તતસ્તત્
 કાર્યઞ્ચૈત્યં જડં વા વિદિતમિહ ભવેજ્જ્ઞેયરૂપં ચ દૃશ્યમ્ ।
પૂર્વ સર્વસ્ય યત્સ્યાત્પ્રભવતિ સુતરાં કારણં હ્યદ્વયં તત્
 તસ્વૈકોઽહં બહુસ્યાં ભવતિ ચ સકલં નાન્યદેતત્તતોસ્માત્ ॥ ૯૦॥

શૂન્યં ન પ્રસ્ફુરેત્તત્વહમિતિ ન તથાજ્ઞાનમેવં જડં વા
 ચૈતન્યસ્યૈવ ભાનં પ્રવિદિતમિહ તત્સર્વપૂર્વં સ્વમાત્રમ્ ।
યત્સ્યાત્સર્વસ્ય પૂર્વં નિરતિશયસુખં સ્વપ્રભં કેવલં સત્
 સ્વાત્માનં બ્રહ્મચાવેત્તદહમિતિ તતઃ સર્વમેતચ્છ્રુતેર્વાક્ ॥ ૯૧॥

"તસ્વા"શબ્દેન નાસજ્જડમિપિ ન તથા સશ્ચિદેવાત્ર હેતુઃ
 યસ્યસ્યાજ્જ્ઞાનમેવં તપ ઇતિ ગદિતં સર્વકાર્યં ચિતઃસ્યાત્ ।
એકં જ્ઞાનં વિશુધ્દં સમભવદિતિ યજ્જ્ઞાનમેવેદમગ્રે
 મધ્યાદ્યન્તેષુ કાર્યં ચિદિતિ તત ઇદં નૈવમસ્માદ્વિભિન્નમ્ ॥ ૯૨॥

યસ્માજ્જાતં તદેવં ભવિત કિલ તતો ભિન્નમીષન્ન કાર્યમ્
 કાર્યે સ્વાર્ચિઃ સ હેતુસ્ત્વવિકૃતમનિશં સ્વીયશક્ત્યા હ્યુદેતિ ।
પૂર્ણં તત્પૂર્ણમેતદ્વ્યયરહિતમિતઃ પૂર્ણમાદાય પૂર્ણમ્
 ચિદ્રૂપં સર્વમેવં યદિ ભવતિ તદા નિર્વિકલ્પં સ્વયં તત્ ॥ ૯૩॥

કસ્મિન્જ્ઞાતે ચ સર્વં વિદિતમિહ ભવેદ્બ્રહ્મ તત્સ્વાત્મરૂપમ્
 તજ્જં તલ્લીનમેવં તદનિતિસકલં ખલ્વિદં બ્રહ્મ તસ્માત્ ।
એકીકૃત્યેદમેવં વિવિધપરિણતં કાર્યમાત્રં પરસ્મિન્
 દૃશ્યં નીત્વાત્વદૃશ્યં ચિદિતિ સુખઘનં પદ્યતે બ્રહ્મભિક્ષુઃ ॥ ૯૪॥

યશ્ચિત્તસ્તન્મયઃસ્યાત્ક્રતુમયપુરુષો બ્રહ્મમત્વા તદેકમ્
 ક્ષીરે ક્ષીરે યથા તજ્જલમિતિ ચ જલે શુધ્દમાસિત્કનેવમ્ ।

તદ્દૃહ્યાપ્યેતિ વિદ્વાન્શ્રુતિરિહતનુતે સ્યન્દ્રમાનશ્ચઃ નદ્યઃ
    હિત્વા સ્વં નામરૂપે જલનિધિસલિલેસ્તં પ્રયાન્તીહ યદ્વત્ ॥ ૯૫॥

યદ્વદ્રજ્જ્વાવશિષ્ઠો ભવતિ ચ ભુજગો દેશિકોક્ત્યા તથૈતત્
    કાર્યં બ્રહ્માવશિષ્ઠં વિવિધપરિણતં સચ્ચિતાનન્દમાત્રમ્ ।
યસ્યૈવં નૈવ કાર્યં કરણમપિ તથા વિદ્યતેભૂદ્ભવિષ્યત
    તદ્બ્રહ્માયં પરિવ્રાટ્ નિજગુરુવચસા કાશતે કાશતેત્ર ॥ ૯૬॥

સર્પો નૈવાસ્તિ રજ્જુર્ભુજગ ઇતિ ચ સા રજ્જુરત્રાર્થ એકઃ
    રજ્જૌ સર્પસ્ય બાધઃ ક્રિયત ઇતિ તતસ્તદ્વદેવાત્ર ભૂમ્નિ ।
કાર્યં બ્રહ્મૈવ વાસ્મિન્કિમપિ ન ચ તથા બ્રહ્માણિ સ્યાદ્ધિકાર્યમ્
    એકોર્થો બ્રહ્મચાત્ર સ્વયમિહ સતતં કેવલં નાન્યદસ્માત્ ॥ ૯૭॥

તત્સત્યં યત્ત્રિકાલે નિજનિરતિશયાદેકરૂપં સ્વપૂર્ણમ્
    જાતં નો વા મૃતં યત્ક્કચિદપિ ન કદા નો વિકારશ્ચ યસ્મિન ।
નિત્યાનન્દાત્મકં યત્સ્વયમતિવિમલં જ્ઞાનમાત્રં હ્યનન્તમ્
    ભિન્નં યસ્મિન્ન કિઞ્ચિજ્જનિતમથ વસેશ્ચૈકમેવાદ્વયં યત્ ॥ ૯૮॥

અગ્રેઐદ્વૈતે ન ચાસીદસદપિ ન ચ સન્નેશ્વરો વા તદાનીમ્
    નાસીદ્વૈરાજરૂપં મહદપિ ન તથા ભૂમ્નિ જીવો રજો વા ।
નાકાશો વાયુરગ્નિર્જલમપિ પૃથિવી સંસૃતિર્નૈવ વિશ્વમ્
    ક્વાનન્દે કસ્ય શર્મન્પ્રલયજલમહો કિં ભવેદાવરીવઃ ॥ ૯૯॥

નો મૃત્યુર્નોઐમૃતત્વં દિનમપિ રજની નો તથા સૂર્યચન્દ્રૌ
    સ્વે નૈવાનીદવાન્ત કિમપિ ન ચ તતોન્યત્તદેકં તદાસીત્ ।
સૃષ્ટેઃપૂર્વ યથા તદ્ધ્યવિકૃતમધુના વર્તતે તાવદેવમ્
    એતદ્બ્રહ્માવિદિત્વા કૃપણ ઇતિ ભવેત્પ્રૈતિ યો મૂઢબુદ્ધિઃ ॥ ૧૦૦॥

જ્ઞેયં યત્તત્પ્રવક્ષ્યામ્યહૃમિતિ ચ વદત્બન્ધમોક્ષસ્ય હેતુમ્
    સન્નૌસન્નાષિ તદ્વદ્વદતિ યદુપતિર્બ્રહ્મ ચાનાદિ મદ્યત ।
નાશૌ નૈવાવ્યયસ્ય ક્વચન ભવતિ વા કોઽપિ કર્તું સમર્થઃ
    સ્વાધારં નોપજીવ્યં વિદલયતિ યતઃ કાશતે કાશતેત્ર ॥ ૧૦૧॥

અદ્વૈતે કાર્યમેતન્મનુત ઇતિ યદાધ્યસ્યતે ભ્રાન્તિરેષા
    મિથ્યા ભ્રાન્તેસ્તદાનીં હ્યવિકૃતમનિશં સ્યાદધિષ્ઠાનમેકમ્ ।
બ્રહ્માદૌ મધ્યતોન્તે ભવતિ યત ઇદં બ્રહ્મમાત્રં હિ કાર્યમ્
    નાધિષ્ઠાનાત્કદાપિ ક્વચિદપિ ચ ભવેદ્ભિન્નતાતારોપિતસ્ય ॥ ૧૦૨॥

નાભાવઃ સ્યાત્સતો યત્સહજ ઇતિ ગ તતોભાવ એવાસતઃસ્યાત્
    નાદિત્યેસ્ત્યન્ધકારોસદપિ સતિ તથા વર્તતે નો કદાચિત્ ।
કુર્યાદદ્વૈતબુધ્દિં દ્વયમિહ ન યતો વેદવાક્યં હિતાય
    ખલ્વેતદ્બ્રહ્મ સર્વં તદિહમહમિતિ બ્રહ્મ વિન્દતે વિદ્વાન ॥ ૧૦૩॥

જ્ઞાતે સત્યેઽપિધત્તે જગદિતિ તદધિષ્ઠાનભૂવેત્ર ભૂમ્નિ
    રૌપ્યં શુક્તૌ યથા સ્યાજ્જગદિતિ ન તતઃ ખલ્વિદં બ્રહ્મ સર્વમ્ ।
યદ્યદ્વીક્ષેત વિદ્વાન્નિજનિરતિશયાત્સ્વીયરૂપં પ્રપશ્યેત્
    ચિત્સૌખ્યાત્મસ્વરૂપે સકલ જગદિદં નાસ્તિ નાસીદ્ભવેન્નો ॥ ૧૦૪॥

સ્વાજ્ઞાનજ્ઞાનહેતૂ જગદુદયલયૌ સર્વસાધારણૌ સ્તઃ
    આજીવ સ્વર્ણગર્ભં શ્રુતય ઇતિ જગુર્હૂયતે ચ પ્રબોધે ।
બન્ધો મોક્ષશ્ચ માયા જગદિદમખિલં ચાપિ જીવેશભેદઃ
    રજ્જ્વજ્ઞાને યથાહિ સ્તદુપરિ ન તથા રજ્જુબોધે ચ તિષ્ઠત્ ॥ ૧૦૫॥

પશ્યન્પૂર્ણાત્મરૂપં સકલજગદિદં શોક મોહાદ્યતીતઃ
    શુધ્દં બ્રહ્માધ્યગચ્છન્નિજનિરતિશયાત્પૂર્ણકામઃ પરિવ્રાટ્ ।
વિસ્મૃત્ય સ્થૂલસૂક્ષ્મે નિખિલમપિ ચ તત્સ્વાવૃતેઃ કાર્યભૂતમ્
    જીવન્મુક્તસ્તુરીયં પદમધિગતવાન્ શાન્તમદ્વૈતરૂપમ્ ॥ ૧૦૬॥

સર્વત્રાનન્દરૂપં પ્રસૃતમિહ સદા નિસ્તરઙ્ગાબ્ધિવદ્યત્
    સત્તામાત્રસ્વરૂપં ચિદમલવિભવં સર્વદૈવૈકરૂપમ્ ।
સર્વેનન્દન્તુ જીવા અધિગતયશસા સ્વીયસચ્ચિત્સુખાબ્ધૌ
    પૂર્ણાનન્દાઃ સ્મ એવેત્યવિરતમધુના સન્તુ શાન્તાશ્ચ તૃપ્તાઃ ॥ ૧૦૭॥

સર્વાનર્થાતિદૂરં શ્રુતિશિરસિ મતં મઙ્ગલં મઙ્ગલાનામ્
    સર્વત્રાદ્વૈતરૂપં સકલ જગદધિષ્ઠાનભૂતં વરેણ્યમ્ ।
સ્મર્ત્રે સ્વૈક્યં વિતન્વન્નિરવધિવિમલ સર્વસૌભાગ્યરૂપમ્
    માયાવિદ્યાદિહીનં સુખઘનમનિશં બ્રહ્મ તત્સર્વદાહમ્ ॥ ૧૦૮॥

॥ ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસદ્ગુરુભગવતા ॥

॥ શ્રી શ્રીધરસ્વામિના વિરચિતં પરિવ્રાડ્ હૃદયં સમ્પૂર્ણમ્ ॥

parivrAj parivrAT (mahAbhArata, Apastambha dharmasUtra)

m. a wandering mendicant, ascetic of the fourth and

last religious order (who has renounced the world).

---

*ParivrAd Hridayam*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*